## सत्यादशपथे । (६६/२१३७)

कृञः [1]इत्येव । सत्यशब्दात् अशपथे[2] डाच् प्रत्ययो भवति कृञो योगे । सत्यशब्दोऽनृतप्रतिपक्षवचनः । क्वचित्तु शपथे च वर्तते, सत्येन [3]शापयेद् द्विजम् इति[4], तस्यायं प्रतिषेधः । सत्याकरोति वणिक् भाण्डम् । मयैतत् क्रेतव्यम् इति [5]तथ्यं करोति । अशपथे इति किम् ? सत्यं करोति ब्राह्मणः ॥

## मद्रात् परिवापणे । (६७/२१३८)

[6]कृञः इत्येव । मद्रशब्दात् परिवापणे[7] डाच् प्रत्ययो भवति कृञो योगे । परिवापणं मुण्डनम् । मद्रशब्दो[8] [9]मङ्गलार्थः । [10]मङ्गलं मण्डनं करोति मद्राकरोति[11] ।

[६३५] भद्राच्चेति वक्तव्यम् । (म. भा. २. ४३७)

भद्राकरोति नापितः कुमारम् । परिवापणे इति किम् ? [12]भद्रं करोति ॥

## समासान्ताः । (६८/६७६)

अधिकारोऽयम् । आपादपरिसमाप्तेः [13]ये प्रत्ययाः विहितास्ते समासान्तावयवा एकदेशाः भवन्ति, तद्ग्रहणेन गृह्यन्ते इति [14]वेदितव्यम् । प्रयोजनम् – अव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसञ्ज्ञाः (म. भा. २. ४३७) । उपराजम् । अधिराजम् । नाव्ययीभावात् (२. ४. ८३/६५७) इत्येष विधिर्भवति, '[15]अनश्च' (५.४.१०८/६७८) इति टच् । द्विपुरी, त्रिपुरी इति । 'द्विगोः' (४. १. २१/४७९) इति ङीप् भवति । कटकवलयिनी । शङ्खनूपुरिणी । कोशनिषदिनी । स्रक्त्वचिनी । द्वन्द्वोपतापगर्ह्यात् (५. २. १२८/१९३४) इति इनिर्भवति । विधुरः । प्रधुरः । तत्पुरुषे तुल्यार्थ (६. २. २/३७३६) इत्येष स्वरो भवति । उच्चैर्धुरः । नीचैर्धुरः । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (६. २. १/३७३५) इत्येतद् भवति ॥

## न पूजनात् । (६९/७८४)

[16]यान् शब्दान् उपादाय समासान्ता विधीयन्ते 'राजाहःसखिभ्यष्टच्' (५. ४. ९१/७८८) इत्येवमादीन्, [17]यदा ते पूजनात् पूजनवचनात् परे भवन्ति [18]तदा समासान्तो न भवति । सुराजा । अतिराजा । सुगौः । अतिगौः ।

[६३६] पूजायां [19]स्वतिग्रहणं कर्तव्यम् । (म. भा. २. ४३९)

[20]इह मा भूत्, परमराजः, परमगवः इति ।

[३६७] प्राग्बहुव्रीहिग्रहणं च कर्तव्यम् । (म.भा. २. ४३९)

बहुव्रीहौ सक्थ्यक्ष्णोः (५. ४. ११३/८५२) [21]इत्येवमादौ प्रतिषेधो न भवति । सुसक्थः । अतिसक्थः । स्वक्षः । अत्यक्षः (म. भा. २. ४३९) ॥

---

1. एव नास्ति फ. 2. अर्थे इत्यधिकम् ब, अर्थे वर्तमानात् इत्यधिकम् क. ड. फ. 3. श्रावयेत् ह. 4. यथा इत्यधिकम् ड. 5. यथातथ्यं ड. 6. वाक्यमिदं नास्ति फ. 7. अर्थे वर्तमानात् इत्यधिकम् क. ड, अर्थे इत्यधिकम् ब. 8. अत्र इत्यधिकम् फ. 9. माङ्गल्यार्थः ड, मङ्गलवचनः क. 10. मङ्गल्यम् ब. फ. ह, शुभं क. 11. कुमारम् इत्यधिकम् फ. 12. मद्रं क. ड. फ. 13. इत ऊर्ध्वं इत्यधिकम् ड. 14. वक्तव्यम् क. 15. वाक्यमिदं नास्ति क. 16. इतः प्रभृति इत्यधिकम् क. 17. यदि ब. फ. 18. ततः ह. 19. प्रतिषेधः क. 20. इह न भवति फ, इह प्रतिषेधः क. 21. इत्येवमादेः ब.